# Devistuti by Devas

# દેવતાકૃતા દેવિસ્તુતિઃ

## Document Information

Text title : Devistuti by Devas

File name : devistutiHdevaiHkRRitA.itx

Category : devii, devI, bRihaddharmapurANam

Location : doc_devii

Proofread by : Ruma Dewan

Description/comments : Brihaddharmapuranam | pUrvakhaNDaH | adhyAyaH 21| 5161 , 6364 |

Latest update : March 27, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 22, 2024

*sanskritdocuments.org*

# દેવતાકૃતા દેવિસ્તુતિઃ

દેવા ઊચુઃ ।
નમસ્યે પુણ્ડરીકાક્ષીં દેવીં પરમદેવતામ્ ।
કાલીં ત્રિનેત્રાં વરદાં શામ્ભવીં શાઙ્કરીં શિવામ્ ॥ ૧॥

ભક્તિપ્રિયાં ભક્તિરૂપાં ભવાનીં ભવવલ્લભામ્ ।
ભૈરવીં ભીમવદનાં ભીમાં ભીમાનનાં શુભામ્ ॥ ૨॥

વૈષ્ણવીં વિષ્ણુરૂપાઞ્ચ વિષ્ણુકાર્યકરીં ક્રિયામ્ ।
સંહારકારિણીં સૃષ્ટિકારિણીં સ્થિતિકારિણીમ્ ॥ ૩॥

કપર્દ્દિનીં કરાલાક્ષીં ચન્દ્રશોભિતમસ્તકામ્ ।
શ્યામાં શ્વેતાં તથા ગૌરીં વિચિત્રાં ચિત્રસુન્દરીમ્ ॥ ૪॥

કૌમારીં શક્તિધાત્રીઞ્ચ દેવાનાં શક્તિરૂપિણીમ્ ।
ચતુર્ભુજાઞ્ચ દ્વિભુજાં ષડ્ભુજાષ્ટભુજાન્તથા ॥ ૫॥

દેવીં દશભુજાં કાલીં બાહુષોડ઼શસંયુતામ્ ।
અષ્ટાદશભુજાં કાલસ્વરૂપાં લક્ષનેત્રિણીમ્ ॥ ૬॥

સહસ્રચરણાં કોટિચ્છવિં નિષ્કલરૂપિણીમ્ ।
સ્થૂલાં શુદ્ધાઞ્ચ સૂક્ષ્માઞ્ચ ખર્વાઞ્ચાથ મહત્તમામ્ ॥ ૭॥

દીર્ઘજિહ્વામપ્રમેયાં સ્તવનીયાં વૃહચ્છિલામ્ ।
કામરૂપાં કામગમાં મન્ત્રરૂપાં જગન્મયીમ્ ॥ ૮॥

બ્રહ્માણ્ડકોટિજઠરાં સર્વામાકાશવાસિનીમ્ ।
વિન્ધ્યાદ્રિનિલયાં શૈલતનયાં લોકપાવનીમ્ ॥ ૯॥

શિવવૃક્ષસ્થિતાં વિલ્વલસ્થાં ગિરિવાસિનીમ્ ।
શ્રીદુર્ગાં દુર્ગતિહરાં શાન્તાં શાન્તજનપ્રિયામ્ ॥ ૧૦॥

પદ્માલયાઞ્ચ પદ્માક્ષીં સહસ્રદલવાસિનીમ્ ।

ત્વં સ્વાહા ત્વં સ્વધા ત્વં હ્રીસ્ત્વં બુદ્ધિસ્ત્રિવિધા પ્રસૂઃ ॥ ૧૧॥

ત્વાં નમસ્યામહે દેવીં દયાર્દ્રહૃદયાં શિવામ્ ।
સ્ત્રીરૂપાં પરમાનન્દરૂપાં બ્રહ્મસનાતનીમ્ ।
નમામઃ પ્રણમામસ્ત્વાં સન્નમામઃ સુભક્તિતઃ ॥ ૧૨॥

સર્વસ્વરૂપાં સર્વેશીં સર્વશક્તિસમન્વિતામ્ ।
ત્વાં નમસ્યામહે દેવી ભયેભ્યસ્ત્રાહિ નોઽમ્બિકે ॥ ૧૩॥

ઇતિ બૃહદ્ધર્મપુરાણાન્તર્ગતા દેવતાકૃતા દેવિસ્તુતિઃ સમ્પૂર્ણા ॥

॥ બૃહદ્ધર્મપુરાણમ્ । પૂર્વખણ્ડઃ । અધ્યયઃ ૨૧। ૫૧-૬૧ , ૬૩-૬૪ ॥

Proofread by Ruma Dewan

*Devistuti by Devas*

pdf was typeset on June 22, 2024

Please send corrections to *sanskrit@cheerful.com*